# यमुनाष्टकम्

नमामि यमुनामहं सकल सिद्धिहेतुं मुदा ।

मुरारिपदपङ्कजस्फुरदमन्दरेणूत्कटाम् ।।

तटस्थनवकानन प्रकटमोद पुष्पाम्बुना ।

सुराचसुरसुपूजितस्मरपितुः श्रियं बिभ्रितीम् ।। १ ।।

कलिन्दगिरिमस्तके पतदमन्दपुरोज्जवला ।

विलासगमनोल्लसत् प्रकटगण्ड शैलोन्नता ।।

सघोषगतिदन्तुरा समधिरूढदोलोत्तमा ।

मुकुन्दरतिविर्धिनी जयति पद्मबन्धोः सुता ।। २ ।।

भुवं भुवनपावनीमधिगतामनेकस्वनैः ।

प्रियाभिरिवसेवितां शुकमयूरहंसादिभिः ।।

तरंगभुजकंकणप्रकट मुक्तिकावालुका ।

नितम्बतटसुन्दरीं नमत कृष्णतुर्यप्रियाम् ।। ३ ।।

अन्नतगुणभूषिते शिवविरंचिदेवस्तुते ।

घनाघननिभे सदा ध्रुवपराशराभीष्टदे ।।

विशुद्धमथुरातटे सकल गोपगोपीवृते ।

कृपाजलधिसंश्रिते मम मनः सुखं भावय ।। ४ ।।

यया चरणपद्मजा मुररिपोः प्रियं भावुका ।

समागमनतोऽभवत् सकलसिद्धिदा सेवताम् ।।

तया सदृशतामियात् कमलजासपत्नीव यत् ।

हरिप्रियकलिन्दया मनसि मे सदा स्थीयताम् ।। ५ ।।

नमोऽस्तुते यमुने सदा तव चरित्रमत्यद्भुतं ।

न जातु यमयातना भवति ते पय:पानत: ।।

यमोऽपि भगिनीसुतान् कथमु हन्ति दुष्टानपि ।

प्रियो भवति सेवनात् तव हरेर्यथा गोपिका: ।। ६ ।।

ममास्तु तव सन्निधौ तनुनवत्वमेतावता ।

न दुर्लभतमा रतिर्मुररिपौ मुकुन्दप्रिये ।।

अतोऽस्तु तव लालना सुरधुनी परं संगमात् ।

तवैव भुवि कीर्तिता न तु कदापि पुष्टिस्थितैः ।। ७ ।।

स्तुति तव करोति कः कमलजासपत्नि प्रिये ।

हरेर्यदनुसेवया भवति सौख्यमामोक्षत: ।।

इयं तव कथाधिका सकलगोपिकासंगम: ।

स्मरश्रमजलाणुभि: सकलगात्रजै: संगम: ।। ८ ।।

तवाष्टकमिदं मुदा पठति सूरसूते सदा ।

समस्तदुरितक्षयो भवति वै मुकुन्दे रति: ।।

तथा सकलसिद्धयो मुररिपुश्च संतुष्यति ।

स्वभावविजयो भवेत् वदति वल्लभ: श्रीहरे: ।। ९ ।।

।। इति श्रीमद्वल्लभाचार्यविरचितं श्री यमुनाष्टक स्तोत्रं सम्पूर्णम् ।।